योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०४५

श्रीवसिष्ठ उवाच ।

इति विश्रान्तवानेष मनोहरिणकोऽरिहन् ।

तत्रैव रतिमायाति न याति विटपान्तरम् ।। १

एतावताथ कालेन स विवेकद्रुमः फलम् ।

अन्तस्थं परमार्थात्म शनैः प्रकटयत्यलम् ।। २

ध्यानद्रुमफलं पुण्यौ तदसौ स्वमनोमृगः ।

अधःस्थितः प्रान्तगतं तस्य पश्यति सत्तरोः ।। ३

आरोहति नरो वृक्षं तदास्वादयितुं फलम् ।

अन्यवर्गपरित्यागो वितताध्यवसायवान् ।।

विवेकवृक्षपान्नाम वृत्तीस्त्यजति भूगताः ।

उन्नतं पदमासाद्य भूयो नाधः समीहते ।। ५

तेनोत्तमफलार्थेन संस्कारान्प्राक्तनानसौ ।

विवेकपादपारूढस्त्यजत्यहिरिव त्वचम् ।। ६

हसत्युच्चैः पदारूढमात्मानभवलोकयन् ।

एतावन्तमहं कालं कृपणः कोऽभवं त्विति ।। ७

करुणादिषु तेष्वस्य भ्रमञ्छाखान्तरेषु सः ।

लोभव्यालमधः कुर्वन्सम्राडिव विराजते ।। ८

हृदयेन्दोर्गलश्रेणी दुःखाब्जतिमिरावलिः ।

कृष्णायःशृङ्खलातृष्णा दिनानुदिनमुज्झति ।। ९

उपेक्षते न संप्राप्तं नाप्राप्तमभिवाञ्छति ।

सोमसौम्यो भवत्यन्तः शीतलः सर्ववृत्तिषु ।। १०

शास्त्रार्थपल्लवेष्वेव निषण्णात्मावतिष्ठते ।

उन्नतावनता याता अधः पश्यञ्जगद्गतीः ।। ११

भीमद्रुमलतोत्कीर्णपुष्पप्रकरदन्तुराः ।

प्राक्तनीः स्वाः स्थलीः पश्यन्हसत्यन्तर्वराकताम्।।१२

तेषु तत्स्कन्धदेशेषु तथोड्डीनविडीनया ।

हारिण्या विहरञ्जात्या राजेव परिराजते ।। १३

पुत्रदारसमग्राणि मित्राणि च धनानि च ।

जन्मान्तरकृतानीव स्वप्नजानीव पश्यति ।। १४

रागद्वेषभयोन्मादमानमोहमहत्तया ।

नटस्येवास्य दृश्यन्ते शीतलामलचेतसः ।। १५

उन्मत्तचेष्टिताकारा हसत्यपि पुरोगताः ।

तरङ्गभङ्गुराधाराः संसारसरितो गतीः ।। १६

न स चेतयते काश्चिल्लोकदारधनैषणाः ।

अपूर्वपदविश्रान्तो जीवन्नेव यथा शवः ।। १७

केवलं केवले शुद्धे बोधात्मनि महोन्नते ।

दत्तदृष्टिः फले तस्मिन्परं समधिरोहति ।। १८

स्मृत्वा स्मृत्वापदः पूर्व संतोषामृतपोषितः ।

अर्थानामप्यनर्थानां नाशेषु परितुष्यति ।। १९

व्यवहारेषु कार्येषु भोगसंपादकेष्वपि ।

परमुद्वेगमायाति सनिद्र इव बोधितः ।। २०

दीर्घाध्यग इवोदारामनारतमबाधिताम् ।

चिरं मौर्ख्यश्रमाक्रान्तो विश्रान्तिमभिवाञ्छति ।। २१

निःश्वासबोधितोऽप्यग्निरनिन्धन इवात्मनि ।

श्वासमात्रसमोऽप्यन्तरतिष्ठन्नेव शाम्यति ।। २२

आपतन्तीं बलादेव पदार्थेष्वरतिं शनैः ।

न शक्नोति निराकर्तुं दृष्टिमत्र च्युतामिव ।। २३

तां महापदवीं गच्छन्परमार्थफलप्रदाम् ।

भूमिकामप्युपायाति वचसामप्यगोचराम् ।। २४

कुतोऽप्यचेष्टितेष्वेव संप्राप्तेषु विधेर्वशात् ।

भोगेष्वरतिमायाति पान्थो मरुमहीष्विव ।। २५

घूर्णः क्षीण इवानन्दी सुप्तः संसारवृत्तिषु ।

अन्तःपूर्णमना मौनी कामपि स्थितिमृच्छति ।। २६

स तादृग्रूपतामेत्य परमार्थफलस्य तत् ।

क्रमान्निकटमाप्नोति खगोऽगपदवीमिव ।। २७

ततस्तदखिलां बुद्धिं विहाय वियता समः ।

गृह्णात्यथास्वादयति भुङ्क्तेऽथ परितृप्यति ।। २८

संकल्पार्थपरित्यागाद्दिनानुदिनमातता ।

शुद्धस्वभावविश्रान्तिः परमार्थाप्तिरुच्यते ।। २९

भेदबुद्धिर्विलीनार्थाऽभेद एवावशिष्यते ।

शुद्धमेकमनाद्यन्तं तद्ब्रह्मेति विदुर्बुधाः ।। ३०

लोकैषणाविरक्तेन त्यक्तदारैषणेन च ।

धनैषणाविमुक्तेन तस्मिन्विश्रम्यते पदे ।। ३१

परेण परिणामेन मिथश्चित्परमार्थयोः ।

तापेन हिमलेखेव भेदबुद्धिर्विलीयते ।। ३२

तज्ज्ञस्याकृष्टमुक्तस्य स्वभावेषूपमां विना ।

स्थितिः स्रग्दामकस्येव न संभवति काचन ।। ३३

यथाऽप्रकटिताङ्गान्तःसंस्थिता शालभञ्जिका ।

न सती नासती स्तम्भे तथा विश्वस्थितिः परे ।। ३४

ध्यानं न शक्यते कर्तुं न चैतदुपयुज्यते ।

अबोधेन विबुद्धस्तु स्वयमत्रैव तिष्ठति ।। ३५

आत्यन्तिकी विरसता यस्य दृश्येषु दृश्यते ।

स बुद्धो ना प्रबुद्धस्य दृश्यत्यागे हि शक्तता ।। ३६

दृश्यस्य बोधताबोधो यो बोधादपरिक्षयः ।

स समाधानशब्देन प्रोच्यते सुसमाहितैः ।। ३७

द्रष्टृदृश्यैकतारूपः प्रत्ययो मनसो यदा ।

स तदेकसमाधाने तदा विश्राम्यति स्वयम् ।। ३८

स्वभावो दृश्यवैरस्यमेव तत्त्वविदो निजः ।

दृश्यस्पन्दनमेवाहुरतत्त्वज्ञत्वमुत्तमाः ।। ३९

अतज्ज्ञायैव विषयाः स्वदन्ते न तु तद्विदः ।

न हि पीतामृतायान्तः स्वदते कटु काञ्जिकम् ।। ४०

वितृष्णस्यात्मनिष्ठत्वादेषणात्रयमुज्झतः ।

ज्ञस्याप्यनिच्छतो ध्यानमर्थायातं प्रवर्तते ।। ४१

बोधः स्फुरति तृष्णायाः सैव यस्य न विद्यते ।

तस्य स्वरूपमुत्सृज्य क्वासौ तिष्ठति कः कथम् ।। ४२

ज्ञस्यानाराधको ध्येयबोधो नयतु यो भवेत् ।

अनन्ता सा वितृष्णस्य निर्विभागोदितः स्वयम् ।।४३

अनन्तमपतृष्णस्य स्वयमेव प्रवर्तते ।

ध्यानं गलितपक्षस्य संस्थानमिव भूभृतः ।। ४४

शुद्धबोधात्मनि ज्ञत्वादसमाहिततोदिता ।

न जातु सुसमिद्धेऽग्नौ घृतविन्दोरवस्थितिः ।। ४५

परं विषयवैतृष्ण्यं समाधानमुदाहृतम् ।

आहृतं येन तन्नूनं तस्मै नृब्रह्मणे नमः ।। ४६

नूनं विषयवैतृष्ण्ये परिप्रौढिमुपागते ।

न शक्नुवन्ति निर्हर्तुं ध्यानं सेन्द्राः सुरासुराः ।। ४७

परं विषयवैतृष्ण्यं वज्रध्यानं प्रसाध्यताम् ।

भेदे विगलिते ज्ञानादन्यध्यानतृणेन किम् ।। ४८

मूर्खस्थो विश्वशब्दार्थो नामूर्खविषयस्तथा ।

तज्ज्ञाज्ञयोस्तयोश्चैव विश्वविश्वेशयोस्तथा ।। ४९

यत्रैकीभूय कचनं तत्र विश्राम्यतां बुधाः ।

बोधभूमिषु सिद्धानामर्थानां वा विवेकिनाम् ।। ५०

सत्तासत्ते द्वयैक्ये च निर्णीते नेह केनचित् ।
उपाय एकः शास्त्रार्थो द्वितीयो ज्ञसमागमः ।। ५१
ध्यानं तृतीयं निर्वाणे श्रेष्ठस्तत्रोत्तरोत्तरः ।
जीवादर्शान्मिथो रूपं गृह्णात्येषा महद्वपुः ।। ५२
जगत्युदेति संघट्टादाविशेषं समे समे ।
ज्ञातपूर्वापराशेषजगदष्टापदस्थितेः ।। ५३
एकसिद्धौ द्वयोः सिद्धिर्बोधवैतृष्ण्यदीपयोः ।
मतिवात्याधुतो व्योम्नि दग्धो ज्ञानाग्निनाखिलः ।। ५४
जगत्तूलः परे शान्ते न जाने क्वाशु गच्छति ।
चित्राग्निनेव बोधेन तेन जाड्यं न शाम्यति ।। ५५
निर्मूलापि जगद्भ्रान्तिर्येनाशु न विलीयते ।
यथाज्ञस्य जगज्ज्ञप्तिरपज्ञानात्प्रदीप्यते ।। ५६
तथा ज्ञस्य परिज्ञानात्तदज्ञप्तिः प्रदीप्यते ।
तज्ज्ञस्याज्ञजगज्ज्ञप्तिशब्दार्थरहिता स्थिता ।। ५७
यथास्थितैव त्रिजगज्ज्ञप्तिश्चित्र इवोदिता ।
शून्यत्वेनैव रचिता सुप्तत्वेनेव निर्मिता ।। ५८
भासते भामयी वाञ्छा जगज्ज्ञप्तिर्ज्ञचेतसि ।
नूनं बोधेऽविमूढस्य नाहंता न जगत्स्थितिः ।। ५९
भासते परमाभासरूपिणः काप्यवस्थितिः ।
बोधाबोधात्मकं चित्तं भाति शुष्कार्द्रकाष्ठवत् ।। ६०
बोधादेकं जगद्भावैर्जाड्यान्नात्मत्वमागतम् ।
मिथो बोधाद्द्विवदति मैत्रीं भजति बोधतः ।। ६१
य एवास्याधिको भागस्तन्मयत्वेन तिष्ठति ।
बुधः सतत्त्वं नावैति जगतोऽभावभावयोः ।। ६२
जाग्रत्स्वप्नसुषुप्तानां स्वभावमिव तुर्यगः ।
वासनैव मनः सेयं स्वविचारेण नश्यति ।। ६३

अवस्तुत्वादतो मोक्षो नात्मनाशे प्रवर्तते ।। ६४

ध्यानद्रुमात्स्वयमुपोढमनल्पपाकात्कालेन बोधमुपयातवतः क्रमेण ।

भुक्त्वा रसायनफलं परबोधमाद्यमिच्छन्मनोहरिणको निगडाद्विमुक्तः ।। ६५

इत्यार्षे श्रीवासिष्ठमहारामायणे बाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे मनोहरिणकोपाख्यानं नाम पञ्चचत्वारिंशः सर्गः ।।४५।।